# श्रीसुरसरस्वतीसभा, शृङ्गेरी

## प्रवेशपरीक्षा - प्रथमपत्रिका

दिनाङ्कः- २७.०१.२०१९ | पूर्वाह्णः १०.००तः १.०० पर्यन्तम्

समयः- होरात्रयम् | अङ्काः - १००

सूचना - सर्वाणि उत्तराणि संस्कृते एव भवेयुः

1. अष्टानाम् एकवाक्येन उत्तरं लिखत। 8

१. पुष्यभूतेः इष्टदेवता का ?

२. " भक्तिसुधातरङ्गिणी " नाम्नि ग्रन्थे कानि प्रकाशितानि सन्ति ?

३. इक्षुकाण्डस्य कवलीकरणं केन कृतम् ?

४. अट्टहासनामा असिः केन अपहृतः ?

५. हर्षस्य पिता कः ?

६. अम्बायाः कामयिता कः ?

७. प्रशमाभरणं किम् ?

८. भीष्मे विसंज्ञे रथात् पतति का ननर्त ?

९. तरुशाखान्तनिघर्षजोऽनलः कं हिनस्ति ?

१०. काशीराजपुत्र्याः नूपुरे कः लग्नः अभवत् ?

2. षण्णां वाक्यद्वयेन उत्तरं लिखत। 12

१. अनर्थपरम्परा का ?

२. सिद्धः स्वचरणोदकसेवया किं किं कृतवान् ?

३. साधनभूमिं प्राप्तं पुष्यभूपतिं के उपजग्मुः ? तेषां नामानि कानि ?

४. कति वासरपर्यन्तं भीष्मपरशुरामयुद्धम् अभवत् ? कः जितवान् ?

५. लक्ष्मणसूरिविरचिते महाकाव्ये के ?

६. मदस्य अनर्थहेतुम् उपपादयत ?



Scanned by CamScanner

७. विक्रमस्य पट्टमहिषी का ? सा कां माणवकसमीपं प्रेषितवती ?

८. गुरुवचनम् अभव्यकृते कथं भवति ?

3. त्रयाणां पञ्चषैः वाक्यैः संस्कृते उत्तरं लिखत। 9

१. श्रीकण्ठनामानं नागं पुष्पभूपतिः किमवोचत् ?

२. कुमारेण कथं वर्तितव्यम् इति शुकनासः उपदिशति ?

३. मतिमान् कीदृशस्य द्विषः समुन्नतिं समुपेक्षेत ? कुतः ?

४. नायकेन वध्यशिलायां कथं भूतं सुखं प्राप्तम् ?

५. उर्वशीं भरतमहर्षिः कुतः अशपत्?

4. त्रयाणां ससन्दर्भं विवृणुत। 9

१. " ते दिव्यं स्थानं न भविष्यति "

२. " सरभसमेहि दृढं परिष्वजस्व "

३. " त्राये नैनं यदि ततः कः शरीरेण मे गुणः "

४. " अनुशाधि गुरोरविधेयम् आत्मजम् "

५. " न तितिक्षासममस्ति साधनम् "

5. एकस्य पद्यस्य सान्वयमर्थं लिखत। 4

१. जपदामकरो जटाधरः कलयन् काञ्चनवेत्रमुज्ज्वलम् ।
विचचार युवतिसुन्दरो भसितालेपनपाण्डरच्छविः ॥

२. प्रकृत्यैव प्रिया सीता रामस्यासीन्महात्मन :।
प्रियभावः स तु तया स्वगुणैरेव वर्धितः ॥

6. श्लोकद्वयं पूरयत । 6

१. कल्यादौ ---------------------- देहि मह्यम्॥



Scanned by CamScanner

२. मातस्त्वत् ---------------------- मह्यम् ॥

३. बलवानपि ------------------------शक्तिसम्पदः ॥

7. एकस्य कवेः देश-काल-कृति-वैशिष्ट्य-विषये लिखत। 4

१. बाणभट्टः २. कालिदासः

8. चतुर्णां रूपाणि परिचाययत। 4

| | | |
|---|---|---|
| १. नभसि | २. चक्षुषा | ३. इमाः |
| ४. परिहृत्य | ५. वस्तु | ६. आसताम् |

9. चत्वारि पदानि संस्कृतवाक्येषु योजयत। 4

| | | |
|---|---|---|
| १. नियमेन | २. नृपतीन् | ३. धिया |
| ४. अपहाय | ५. वाचि | ६. सन्निवेशितः |

10. चतुर्णां पर्यायपदं लिखत । 6

| | | |
|---|---|---|
| १. विविक्ते | २. धीवरः | ३. नरनाथः |
| ४. क्षपा | ५. अम्भः | ६. वाजी |

11. चतुर्णां सन्धिं विभज्य सन्धिनाम लिखत। 4

| | | |
|---|---|---|
| १. सन्निहितेष्वपि | २. शिवमौपयिकम् | ३. विधिहेतुरहेतुः |
| ४. पुण्यालिमारात् | ५. गिरैव | ६. व्यतरद्द्विषजाम् |

12. चतुर्णाम् एकपदं लिखत । 4

| | | |
|---|---|---|
| १. दुःखेन अवाप्तुं योग्या | २. गन्तुमिच्छुः | ३. धनुर्मध्यम् |
| ४. यागं कृतवान् | ५. मुखे भवम् | ६. चौर्येणावाप्तं धनम् |



Scanned by CamScanner

13. चतुर्णां व्याकरणविशेषं लिखत । 8

१. शैशवादारभ्य
२. अलमस्मै कर्मणे
३. भवते रोचते
४. सुदिनायते
५. विजयस्व
६. लोकमधितिष्ठति

14. चतुर्णां विग्रहवाक्यानि विलिख्य समासनामानि लिखत। 8

१. विवशीभूतहृदया
२. पुष्पभूतिवृत्तान्तम्
३. महामन्त्रैः
४. प्रदोषसमयनिशाकरः
५. अनुपमकरुणाम्
६. कथान्तरेषु

15. द्वयोः तत्तल्लकारस्य सर्वाणि रूपाणि लिखत। 6

१. अमन्यत
२. कुरुते
३. लेभे
४. सिषेवे
५. जगाम
६. लभताम्

16. चतुर्णां रिक्तस्थानानि पूरयत। 4

१. उपकृतं खलु -----------इति मनसि अचिन्तयत् ।

२. देव ! दिष्ट्या वर्धसे --------।

३. प्रभाकरवर्धनस्य अपरं नाम -------।

४. शमयामास रुजः सः -------।

५. नरसिंहभारतीमहास्वामिनः ------- पीठाधिपतयः आसन् ।



Scanned by CamScanner

श्रीसुरसरस्वतीसभा, शृङ्गेरी

प्रवेशपरीक्षा - द्वितीयपत्रिका

दिनाङ्कः - २७.०१.२०१९ | अपराह्नः १.३०तः ३.००पर्यन्तम्

समयः - सार्धैकहोरा | अङ्काः ५०

सूचना - सर्वाणि उत्तराणि संस्कृते एव भवेयुः

1. विषयद्वयं सोदाहरणं विवृणुत। 10

१. सन्नन्तधातुरूपाणि कानि ?

२. छन्दसः भेदौ कौ ? दोधकस्य आर्यायाः च लक्षणं किम् ?

३. विशेषसमासाः के ? सोदाहरणं लिखत ।

2. द्वौ सोदाहरणं विवृणुत। 8

१. शालिनीवृत्तम् आर्यावृत्तं च ।

२. रूपकालङ्कारः

३. कर्म-भावद्योतकौ कृदन्तौ

3. त्रयाणां रूपाणि पुरुषवचनत्रये लिखत। 9

१. क्रीणाति    २. कुर्वीत    ३. चक्रे

४. करोतु    ५. तनिष्यति    ६. सुषुवे

4. चतुर्णाम् अन्यलिङ्गरूपाणि लिखत। 4

१. त्यक्तवान्    २. दाता    ३. पोषकः

४. भुक्तवान्    ५. कुर्वाणम्    ६. भावुका

5. द्वयोः प्रयोगं व्यत्यस्यत। 3

१. गुरुभिः उपदेशः क्रियते।    ३. वामनेन बलिः याच्यते वसुधाम्।

२. गुरुः माणवकं धर्मं ब्रूते ।    ४ . गोपालः पयः दोग्धि



Scanned by CamScanner

6. त्रयाणां विग्रहवाक्यं कृत्वा समासनाम लिखत। 6

१. उपकृष्णम्  २. देवब्राह्मणः  ३. त्रिलोकी

४. हरित्रातः  ५. पुरुषव्याघ्रः  ६. अधर्मः

7. मातृभाषया अनुवदत । 5

१. सत्यपूतां वदेद्वाचं मनःपूतं समाचरेत्।

२. मम दुहितरं द्रष्टुं वरपक्षीयाः श्वः अत्र आगमिष्यन्ति।

३. पुत्रमेवं गुणोपेतं चक्रवर्तिनमाप्नुहि।

४. सुधाम्बुधिं चिरं मथ्नन्तोऽपि सुराः सुधां नालभन्त।

५. भगवान् रसात्मकः सोमो भूत्वा सर्वाः औषधीः पुष्णाति।

8. संस्कृतभाषायाम् अनुवदत । 5

1. ಕವಿಗಳು ಮಹಾತ್ಮರ ಕೀರ್ತಿಯನ್ನು ಎಲ್ಲ ದಿಕ್ಕುಗಳಲ್ಲೂ ಹರಡುತ್ತಾರೆ.

   Poets spread the fame of great people in all directions.

2. ಪಾಪಕರ್ಮಿಯು ಪಾಪದ ಫಲವನ್ನು ಅನುಭವಿಸುತ್ತಾನೆ.

   Sinner experiences the fruit of sin.

3. ಶ್ರೀರಾಮನು ತಂದೆಯ ಮಾತನ್ನು ಪಾಲಿಸುವುದಕ್ಕಾಗಿ ಕಾಡಿಗೆ ಹೋದನು.

   Sri Rama went to the forest to keep up his father's words.

4. ಸತ್ಯವನ್ನೇ ಯಾವಾಗಲೂ ಹೇಳಬೇಕು; ಸುಳ್ಳನ್ನು ಹೇಳಬಾರದು.

   Always should tell truth ; should not tell lies.

5. ರಾಜನು ನ್ಯಾಯಮಾರ್ಗದಿಂದ ರಾಜ್ಯವನ್ನಾಳಲಿ.

   Let the king rule the kingdom justly.

--------



Scanned by CamScanner